# संस्कृतवार्ता:

दिनाङ्क : 13/08/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- एकोनाशीतितमं स्वातन्त्र्यदिवसोत्सवं समाचरितुं राष्ट्रम् सज्जं भवति; अष्टाविंशति राज्यानां केन्द्रशासितप्रदेशानाञ्च द्विशत पञ्चायत्-नेतारः नवदेहल्यां भागं ग्रहीष्यन्ति।
- द्विपाक्षिकसम्बन्धान् सुदृढं कर्तुं नवदेहल्यां भारत-सिङ्गापुर्-देशयोर्मध्ये मन्त्रिस्तरीय-वार्ता अभवत्।
- अद्य उत्तराखण्ड- तेलङ्गाना, बिहार, तटीय-आन्ध्रप्रदेशेषु च प्रचण्डवृष्ट्यै ऋतुविज्ञानविभागेन रेड्-अलर्ट इति सञ्चेतना प्रसारितास्ति।
- गुलवीरसिङ्घः बुडापेस्ट्-नगरे पुरुषाणां त्रिसहस्र मीटर इति स्पर्धायाः ओलिम्पिक्-येतर-स्पर्धायां स्वस्य एव राष्ट्रिय-कीर्तिमत् उत्तमं कृतवान्।

-----------------------------------------------

<u>स्वतन्त्रता दिवसस्य उत्सवः</u>

अगस्त-मासस्य पञ्चदश-दिनाङ्के देशस्य एकोना-शीतितमं स्वातन्त्र्यदिनं पूर्णोत्साहेन, देशभक्ति-भावनया च आचरितुं राष्ट्रम् सज्जमस्ति। स्वातन्त्र्य-दिवसोत्सव-पर्यन्तं, सम्पूर्णे देशे जनाः हर-घर-तिरङ्गा इत्यभियाने सक्रियरूपेण भागं गृह्णन्तः सन्ति। केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य स्वनिवासे अस्याभियानस्य भागरूपेण राष्ट्रध्वजाय विशेषसम्मानं दत्तवान्, केन्द्रीय-कृषि-मन्त्री शिवराजसिंह-चौहानः अपि राष्ट्रध्वजस्य आरोहणं कृत्वा पूर्णोत्साहेन देशभक्त्या च हर-घर-तिरङ्गेति अभियाने भागं ग्रहीतुं जनान् प्रार्थयत्।

उत्तरप्रदेशे मुख्यमन्त्री योगी आदित्यनाथ: अद्य लखनऊ-नगरस्य स्वस्य आधिकारिक-निवास-स्थानात् त्रिदिवसीयं 'हर घर तिरङ्गा' इति अभियानम् आरभत।

1820 बाइट - योगी आदित्य नाथ - 33 से.

देहली-नगरस्य मन्त्री आशीष सूदः भाजपा-पक्षस्य सांसदभूता कमलजीत सेहरावत इत्येषा च देहली-नगरस्य नैऋत्य-मण्डले तिरङ्गा-यात्रायाः नेतृत्वं कृतवन्तौ, यस्मिन् अष्ट-शताधिकाः जनाः भागम् अगृह्णन्।

केन्द्रीय-महिला-बाल-विकास-मन्त्री अन्नपूर्णा देवी झारखण्ड-राज्यस्य कोडरमा-मण्डले स्वस्य आधिकारिक-निवासस्थाने त्रिवर्ण-ध्वजं उत्तोलितवती। स्वातन्त्र्यदिने पूर्णसुरक्षायै देहली-आरक्षकैः विस्तृतसुरक्षाव्यवस्था कृता अस्ति। स्वातन्त्र्यदिनस्य समारोहे सामान्य-जनानाम् उपस्थितिं सुकरं कर्तुं देहली-मेट्रो-यानस्य सर्वेषु मार्गेषु प्रातः चतुर्वादनादेव स्वसेवाः आरप्स्यन्ते । अस्य मासस्य पञ्चदशदिनाङ्के, प्रधानमन्त्री नरेन्द्रमोदी देहलीनगरस्य ऐतिहासिकात् रक्तदुर्गात् स्वातन्त्र्य-दिनाचरणे राष्ट्रस्य नेतृत्वं करिष्यति। सः ध्वजारोहणं कृत्वा ऐतिहासिकात् स्मारक-प्रासादात् राष्ट्रम् संबोधयिष्यति। केन्द्र-शासित-जम्मू-कश्मीर-प्रदेशे, विशेषतः पाकिस्तान-देशस्य सीमायां, स्वतन्त्रता-दिवसात् प्राक् क्षेत्रेऽस्मिन् शान्तिं स्थापयितुं सुरक्षावृद्धिः कृता अस्ति।

-------------------------------------------------

## <u>28 राज्यानां नेतारः</u>

अष्टाविंशतिः राज्यानां केन्द्रशासितप्रदेशानाञ्च प्रायः द्विशतसंख्यकाः पञ्चायत्-नेतारः अगस्तमासस्य पञ्चदश-दिनाङ्के नवदेहल्यां स्वातन्त्र्य-दिवस-समारोहे विशेष-अतिथि-रूपेण भागं ग्रहीष्यन्ति। अस्मिन् वर्षे विशेष-अतिथिषु बहुसङ्ख्यकाः महिला-पञ्चायत्-नेत्र्यः अपि सन्ति, याः स्वग्रामपञ्चायत-मध्ये उत्तमसंरचनायाः, उत्तम-सार्वजनिक-सेवायाः, समावेशी-सामुदायिक-उपक्रमाणां च उल्लेखनीय-परिष्कारान् आनयन्। पञ्चायती-राज्-मन्त्रालयः अवदत् यत् एते विशेष-अतिथयः हर-घर-जल-योजना, प्रधानमन्त्री-आवास-योजना, ग्रामीण- मिशन-इन्द्रधनुष् इत्यादीनां प्रमुख-सर्वकारीय-योजनानां कार्यान्वयने उल्लेखनीयं साफल्यं प्राप्तवन्तः इति।

-------------------------------------------------

## इण्डिया-सिङ्गापुरौ

नवदेहल्यां भारत-सिङ्गापुर-मन्त्री-स्तरीयस्य चक्रमञ्चीय-सम्मेलनस्य तृतीयं चरणं प्रचलति। केन्द्रीयमन्त्री डा. एस्. जयशङ्करः, निर्मला सीतारमणः, अश्विनीवैष्णवः, पीयूषगोयलश्च सम्मेलनेऽस्मिन् भागं गृहीतवन्तः। सिङ्गापुर-देशस्य उपप्रधानमन्त्री गान् किम् योङ्गः विदेश-कार्यमन्त्री जोसेफ़िन् टियो इत्येताभ्यां सह सिङ्गापुर्-देशस्य अन्ये मन्त्रिणः अधिकारिणश्च भागम् अभजन्। विदेशमन्त्रालयः अवदत् यत् मंत्रिस्तरीय-सम्मेलनेऽस्मिन् भारत-सिङ्गापुर्-सहकारस्य नूतनोऽध्यायः समारभते इति।

--------------------------------------------------

## राष्ट्रपतिः-राजस्थान-दुर्घटना

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः इत्येषा राजस्थानस्य दौसा-मण्डले जातायां मार्ग- दुर्घटनायां मृतानां जनानाम् विषये शोकं प्रकटितवती। अस्यां दुर्घटनायां व्रणिताः शीघ्रं स्वस्थाः भवेयुः इत्यपि सा आशां व्यक्ती कृतवती। प्रधानमन्त्रिणा नरेन्द्रमोदिना अपि दुर्घटनायां मृतानां जनानां विषये दुःखम् प्रकटितम्। स्वस्य सन्देशे, सः तेषां परिवारान् प्रति शोकं प्रकटितवान्। सः अघोषयत् यत् प्रत्येकस्मै मृतकस्य निकटवर्तिने प्रधानमन्त्री-राष्ट्रिय-सहाय्य-कोषात् द्विलक्षरूप्यकाणां अनुग्रह-धनं, व्रणितेभ्यश्च पञ्चाशत् सहस्र-रूप्य-काणीति दीयते।

--------------------------------------------------

## भाजपा-काङ्ग्रेस-पक्षौ

भाजपेति दलम् अद्य काङ्ग्रेसदल-सदस्यं लोकसभायां विपक्षीय-नेतारं राहुलगान्धिनं निर्वाचन-आयोगं विरुध्य मत-चौर्यस्य आरोपविषये वाक्प्रहारं अकरोत्। नवदेहल्यां प्रसारमाध्यमान् सम्बोधयन् भाजपा-पक्षस्य सांसदः अनुराग-ठाकुरः आरोपितवान् यत् यदा कदापि सः निर्वाचने पराजितः भवति तदा श्रीगान्धी ईवीएम इति मतदान-यन्त्राणि दोषयतीति । सः अवदत् यत् प्रत्येकं पराजयानन्तरं काङ्ग्रेस्-दलम् उत्तरदायित्वं अस्वीकृत्य व्याजम् अन्वेष्टुं प्रयतते।

-------------------------------------------------

<u>सर्वोच्चन्यायालयः/अध्वकुक्कुराः</u>

भारतस्य मुख्यन्यायाधीशः बी.आर. गवई इत्येषः अद्य अवदत् यत् सर्वोच्चन्यायालयः दिल्ली-एन्. सि. आर्. इति क्षेत्रे स्वमिर-हितानां कुक्कुराणां स्थानान्तरस्य विषये विचारं करिष्यति इति।

-------------------------------------------------

<u>कृषक-शासनोपवेशनम्</u>

देशविदेशेभ्यः समागताः कृषकाः प्रधानमन्त्रिणे नरेन्द्रमोदिने, कृषिक्षेत्रीय-साहसिकनिर्णयेभ्यः धन्यवादम् अकुर्वन्। कृषकाणां हितरक्षणाय सर्वकारस्य निर्णायक-कार्येभ्यश्च कृतज्ञतां समर्थनं च प्रकटयितुं कृषक-सङ्घस्य नेतारः कृषकाश्च केन्द्रीयकृषि-कृषक-कल्याण-मन्त्रिणा शिवराज्-सिङ्घ्-चौहान् इत्यनेन सह नवदेहली-नगरे मिलितवन्तः। भारतीय-कृषक-चौधरी-चरण्-सिङ्घ्-संस्थायाः राष्ट्रिय-अध्यक्षः धर्मेन्द्र-चौधरी इत्येषः अवदत् यत्, प्रधानमन्त्री-मोदी-वर्यस्य निर्णयाः न केवलं कोटिशः खाद्य-प्रदायकेभ्यः सहायतां प्रदास्यन्ति अपितु राष्ट्रिय-कृषिक्षेत्रस्य ग्रामीण-क्षेत्राणाञ्च स्वावलम्बी-करणमपि करिष्यन्तीति।

-------------------------------------------------

<u>ऋतुविज्ञानम्</u>

ऋतुविज्ञान-विभागेन अद्य उत्तराखण्ड-बिहार-तेलङ्गाना-तटीय-आन्ध्रप्रदेश आदिषु च क्षेत्रेषु अत्यधिक-वृष्ट्यै रक्तवर्णीया सञ्चेतना दत्तास्ति।

-------------------------------------------------

<u>गुलवीरसिङ्घः3000 मीटर</u>

गुलवीरसिङ्घः बुडापेस्ट्-नगरे पुरुषाणां त्रिसहस्र मीटर इति स्पर्धायाः ओलिम्पिक्-येतर-स्पर्धायां स्वस्य एव राष्ट्रिय-कीर्तिमत् उत्तमं कृतवान्।

**।। इति वार्ता: ।।**